# पुणना International School
Shree Swaminarayan Gurukul, Zundal

| SUMMATIVEASSIGNMENT -2-2021-22 | |
|---|---|
| GRADE – 7 | SUBJECT- SANSKRIT |
| SYLLABUS – CH-9 to 15 FROM TEXTBOOK | |

## अपठित-गदयांश

### प्र-1 अधोलिखतम अनुच्छेदान पठित्वा प्रदत-प्रश्नानाम उतराणि लिखत

1 - भारते षड ऋतवः भवन्ति - वसन्तः, ग्रीष्मः, शरद, वर्षा, हेमन्तः, शिशिरः च। ग्रीष्मकालस्यपश्यात वर्षाऋतुः आगच्छति। वर्षाकाले ग्रीष्मस्यतापेनशुष्काः पादपाः पुन हरिताः। आकाशः कृष्णेः मेघैः आच्छादितः भवति। नद्यः जलवेगेन प्रवहन्ति कुत्रचित अत्यधिका वृष्टिः भवति कुत्रचित च अनावृष्टिः। वृष्टेः अभावात कृषकाः महत कष्टम अनुभवन्ति। ते वर्षादेवं प्रार्थयन्ति। वर्षाजिलेन धरा शस्य-श्यामला भवति। एतत दृष्टवा कृषकाणां चितं प्रफुल्लितम भवति।

(क)- एकपदेन उतरत -

1- भारते कति ऋतवः भवन्ति?
2- ग्रीष्मस्यपश्यात कः ऋतुः आगच्छति?
3- नद्यः कथं प्रवहन्ति?
4- वृष्टेः अभावात केमहत कष्टम अनुभवन्ति?

(ख)-पूर्णवाकयेन उतरत -

1- भारते षड ऋतवः केसन्ति?

(ग)-वाकयनिर्माण कुरुत-
1- ग्रीष्मकालस्य

2- जलवेगेन

2- भारतवर्षः अस्मांक जन्मभूमिः। वयं भारतीयाः स्म। भारते रम्याः देवालयाः, चित्र -विचित्रा-उत्सवाः,विविधाः, वेशभूषाः। अत्र अनेकानि दर्शनीयानि स्थानानि। वैदेशिकाः अत्र पर्यटनाय आगच्छन्ति। देशस्य च वविधतां दृष्टवां विस्मिताः भवन्ति। यदि पर्यटकानां निवासाय भ्रमणाय च सुव्यवस्था भवेत तर्हि अधिकाधिकाः वैदेशिकाः

पर्यटकाः आगमिष्यन्ति। भारत- सर्वकारस्य पर्यटन-विभागः लाभान्वितः भविष्यति। देशः च समुद्धः भविष्यति।'अतिथिदेवो भव' इति शास्त्रवचनम।

(क)- एकपदेन उतरत -

1- अस्मांक जन्मभूमिः कः?

2- वयम के स्म?

3- के अत्र पर्यटनाय आगच्छन्ति?

4- कः देवो भवेत?

(ख)-पूर्णवाकयेन उतरत -

1- वैदेशिकाः पर्यटकाः कथं विस्मिताः भवन्ति?

(ग)- समानार्थक पदानि लिखत-

- देवालयः
- भूमि

3- गंङ्गा देशस्य प्रमुखा नदी।गंङ्गायाः अपरं नाम भागीरथी। एषा नदी

हिमालयात निर्गच्छति। एतस्यां नद्याः तीरे बहवः तीर्थाः मुनीनाम आश्रमाः च सन्ति। हरिद्वारनगरम प्रसिद्धं तीर्थस्थानम गंगानद्याः तटम अलंकरोति। अत्र अनेकेः देवालयः सन्ति। सायंकालस्य दृश्यम तु अत्र अनुपमम एव। भक्ताः गंगादेवीं श्रद्धया पूजयन्ति, प्रज्वलितान दीपान च नद्याः जले प्रवाहयन्ति। यदा प्रज्वलिताः दीपाः जलेषु तरन्ति, तदा एवं प्रतीयते यत ताराणां समूहः आकाशात अवतीर्य पृथिव्याम आगतः। गंगानदी परमपावना नदी मन्यते।

(क)- एकपदेन उतरत -

1- देशस्य प्रमुखा नदी का?

2- एषा नदी कस्मात पर्वतात निर्गच्छति?

3- भक्ताः गंगानदी कथम पूजयन्ति?

4- भक्ताः कान नद्याः जले प्रवाहयन्ति?

(ख)-वाकयनिर्माण कुरुत-

1- नदी 2- हिमालय

3- तीर्थ 4- देवालय

4- लोकमान्यः बालगंगाधरतिलकः महान देशभक्तः आसीत। बाल्यकालात। एव एतस्य देशभक्तस्य रुचिः राजनीतौ आसीत। अत एव सः विधिशास्त्रस्य अध्ययनम अकरोत। एषः राजद्रोही इति दोषारोपणं कृत्वा ब्रिटिश-सर्वकारः तम कारागारे अक्षिपत। सः कारावास-काले अपि प्रयत्नशीलः आसीत। सः गीतयाः अध्ययनं कृत्वा 'गीता-रहस्यम' नाम महाग्रन्थम अरचयत। राष्टे नवचेतनां जार्गारियतुं सः आजीवनं प्रयत्नम कृतवान। एषः राष्ट्वादी 'स्वराज्यम असमाकं जन्मसिद्धिः अधिकारः'इति अधोषयत।

(क)- एकपदेन उतरत -

1- देशभक्तस्य तिलकस्य रुचिः कस्याम असीत?

2- सः कस्य शास्त्रस्य अध्ययनम अकरोत?

3- सः कम ग्रन्थम अरचयत?

4- महान देशभक्तः कः आसीत?

(ख)-पूर्णवाकयेन उतरत -

1- एषः राष्ट्वादीकिम अघोषयत?

2- सः आजीवनं किं अकरोत?

## प्र-2 मञ्जूषायाः सहायतया रिक्तस्थानानि पूरयित्वा अनुच्छेद कुरुत-

मञ्जुषा- ( भ्रमणाय, सूर्य, स्वकार्यम, विद्यालयम, सुखकरः, अनुभवन्ति, मनोहरम, पुष्पाणि )

1- प्रातःकालः अति सुखकरः भवति। वृक्षषे खगाः मधुरं कूजन्ति। उद्यानेषु पुष्पाणि विकसन्ति। पवनः सुगन्धः शुद्धः च अस्ति। जनाः भ्रमणाय गच्छन्ति। यदा सूर्य पूर्वदिशायाम उदंय गच्छति,तदा दृश्यम मनोहरम भवति। प्रायःजनाः स्वकार्यम उल्लासेन कुर्वन्ति। छात्राः प्रसन्नमुखेन विद्यालयम पठनाय गच्छन्ति। सर्वे नवजीवनम इव अनुभवन्ति ।

2- मञ्जुषा- ( रावणः, मर्यादापुरूषोतम, श्रीरामस्य, रावणम, पितु, वनम, निवासम, लंका-राज्यम, पत्नी )

श्रीरामः मर्यादापुरूषोतम आसीत। आज्ञां पितु पालयितुम सः चतुदशवर्षाणि यावत वने निवासम अकरोत। तेन सह तस्य पत्नी सीता भ्राता लक्ष्मणः चापि वनम अगच्छताम। वने रावणः सीताम अपाहरत। रामः रावणम

हत्या सीताम आनयत। सः लंका-राज्यम विभीषणाय अयच्छत। रामायणे श्रीरामस्य जीवन-कथा अस्ति।

3- मञ्जुषा- ( भारतदेशस्य, नृत्यम, आनन्देन, मुकुटम , उपवनेषु, मनोहरः, राष्ट्रपक्षीः, वर्षाकाले, सर्पानि , शिखण्डी )

प्रत्येक - देशस्य कोऽपि राष्ट्रपक्षीः अस्ति। यथा श्येनः अमेरिकादेशस्य, तथा मयूरः भारतदेशस्य राष्ट्रपक्षीः अस्ति। एषः अतीव मनोहरः पक्षी अस्ति।

वर्षाकाले यदा एषः मेघान पश्यति तदा आनन्देन नृत्यति। मयूरः सर्पानि खादति। एषः वनेषु उपवनषु च वसति। मयूरस्य नृत्यम दर्शनीयम अस्ति। अस्य मस्तके शिखण्डः मुकुटम इव शोभते, अत एव अस्य नाम शिखण्डी अपि अस्ति।

## रचनात्मक-कार्यम

### प्र-3 चित्रं दृष्टवा मञ्जुषातः पदानि च प्रयुज्य वाक्यानि रचयत-

1-मञ्जुषा- ( वर्षायाम, बालाः, धारयन्ति, बसयानम, छत्रम, ते, आरोहन्ति




- बालाः छत्रम धारयन्ति।

- बालाः वर्षायाम छत्रम धारयन्ति।
- बालाः वर्षायाम बसयानम आरोहन्ति।
- ते बसयानम आरोहन्ति।

2- मञ्जुषा- ( खगाः, विकसन्ति, कमलानि, उदेति, कीडन्ति, डयन्ते, सूर्यः, चित्रपतङ्गा, कूजन्ति, बालाः )



- प्रातः सूर्यः उदेति।
- गगने खगाः कूजन्ति।
- सरोवरे कमलानि विकसन्ति।
- पुष्पेषु चित्रपतङ्गाः डयन्ते।
- बालाः पादकन्दुकेन कीडन्ति।
- प्र-8 चित्रं दृष्ट्वा मञ्जूषात पदानि च प्रयुज्य वाक्यानि □□□□□□
-
- खगाः,विकसन्ति,कमलानि,उदेति,क्रीडन्ति,डयन्ते,सुर्यः,चित्रपतङ्गाः,कूजन्ति



- (क) सूर्यः उदेति।
- (ख) खगाः कूजन्ति।
- (ग) बालाः क्रीडन्ति।
- (घ) कमलानि विकसन्ति।
- (ङ) चित्रपतङ्गाः डयन्ते।

## प्र- 4 रेखांङ्कितानि पदानि आधृत्य प्रश्न निर्माणं कुरूत-

1- **मालिनी** द्वामुदघाटयति।

जवाब- **का** द्वामुदघाटयति?

2-शिक्षा **सर्वेषां बलाना** मौलिकः अधिकारः।

जवाब- शिक्षा **केषाम** मौलिकः अधिकारः?

3- दर्शना आश्चर्येण **मालिनीं** पश्यति।

जवाब-दर्शना आश्चर्येण **काम** पश्यति?

4- दर्शना तस्याः पुत्री च मिलित्वा **परिवारस्य** भरणपोषणं कुरूतः स्म।

जवाब- दर्शना तस्याः पुत्री च मिलित्वा **कस्य** भरणपोषणं कुरूतः स्म?

5- कालेन **चटकायाः** सन्ततिः जाता।

जवाब- कालेन कस्याः सन्ततिः जाता?

6- चटकायाः नीडं भुवि अपतत।

जवाब- चटकायाः किम भुवि अपतत?

7- गजस्य वधेनैव मम दुःखम अपसरेत।

जवाब- कस्य वधेनैव मम दुःखम अपसरेत?

8- काष्ठकूटः चञ्च्वा गजस्य नयने स्फोटयिष्यति।

जवाब- काष्ठकूटः कया गजस्य नयने स्फोटयिष्यति?

9- संस्कृते ज्ञानविज्ञानयोः निधिः सुरक्षितोऽस्ति।

जवाब- संस्कृते ज्ञानविज्ञानयोः काः सुरक्षितोऽस्ति?

10- संस्कृतमेव सङ्गणकस्य कृते सर्वातिमा भाषा।

जवाब- संस्कृतमेव कस्य कृते सर्वातिमा भाषा?

11- मन्त्री सेतोः उदघाटनार्थम आगच्छति।

जवाब- मन्त्री किमर्थम आगच्छति?

12- कर्मकराः सेतोः निर्माणम कुर्वन्ति।

जवाब- के सेतोः निर्माणम कुर्वन्ति?

13-सलिले नौकासेलति।

जवाब- सलिले का सेलति?

14- पुष्पेषु चित्रपतङ्गाः डयन्ते।

जवाब- केष चित्रपतङ्गाः डयन्ते?

15- उष्ट्रः पृष्ठे भारं वहति।

जवाब- कः पृष्ठे भारं वहति?

16- धावनसमये अश्वःकिमपि न खादति।

जवाब- <u>कदा</u> अश्वःकिमपि न खादति?

17- उदेति <u>सूर्य</u> धरणी विहसति।

जवाब- <u>कस्मिन</u> उदेति धरणी विहसति?

18- <u>पिता</u> हिते नियुङक्ते।

जवाब- <u>कः</u> हिते नियुङक्ते?

## व्याकरण

### प्र-5 विलोमपदानि लिखत-

- कतुम - विक्रेतुम
- श्वः - ह्यः
- ग्रामम - नगरम
- समीस्थम - दूरस्थम
- पृच्छति - कथयति
- सुखिन - दुःखिन
- अपहाय - गृहीत्वा
- मन्दम - क्षिप्रम
- नीचै - उच्चैः
- कठोरः - स्निग्धम
- पुरातनम - नूतनम
- अपर्याप्तिम - पर्याप्तिम

### प्र-6 समानार्थक पदानि लिखत-

- आश्चर्येण - विस्मयेन
- उल्लासेन - प्रसन्नतया
- परिवारस्य - कुटुम्बस्य
- अध्ययनस्य - पठनस्य

- कालः - समयः
- अवरूद्धः - बाधित
- धरणी - पृथ्वी
- हरिणः - मृग
- विपिने - वने
- सलिले - जले
- करालम - भयङ्करम
- मन्दिरे - देवालय

## प्र-7'आम' ,'न' इति लिखत-

1- धावनसमये अश्वः खादति। - न

2-उष्ट्रः पृष्ठे भारं न वहति। - न

3- सिंहः नीचैः क्रोशति । - न

4- पुष्पेषु चित्रपतङ्गाः डयन्ते। - आम

5- वने व्याघ्रः गर्जति। - आम

6- हरिणः नवघासम न खादति। - न

## प्र- 8 अधोलिखितानि पदानि आधुत्य वाक्यानि रचयत-

1- **प्रश्ना-** बालकस्य मनसि बहवः प्रश्नाः सन्ति।

2- **नवीनः-** अयं नवीन : सेतुः अस्ति।

3- **प्रातः-** सा प्रातः उद्यानम गच्छति।

4- **आगच्छति-** मम भगिनी विद्यालयात आगच्छति।

5- **प्रसन्न-** छात्रः प्रसन्नः अस्ति।

6- **चटकाः-** वृक्षे एका प्रतिवसति स्म।

7- **वसुधैव-** उदारचरितानां तु वसुधैव कुटुम्बकम।

8- **विद्या-** विद्या राजसु पूज्यते।

9- संस्कृत- संस्कृत भाषा प्राचीनतमा अस्ति।

10- सूर्य- उदेति सूर्य धरणी विहसति।

# साहित्य

## प्र-9 एकपदेन उतरत-

1- गिरिजायाः गृहसेविकायाः नाम किमासीत? - दर्शना

2- दर्शनायाः पुत्री कति वर्षीया आसीत? - अष्टवर्षीया

3- दर्शनायाः पुत्री कथं नृत्यति? - करतलवादनसहितम

4- अद्यत्वे शिक्षा अस्मांक कीदृशः अधिकारः? - मौलिकः

5- वृक्षे का प्रतिवसति स्म? - चटका

6- वृक्षस्य अधः कः आगतः? - गजः

7- गजःकेन शाखाम अत्रोटयत? - शुण्डेन

8- काष्ठकूटः चटकां कस्याः समीपम अनयत? - मक्षिकायाः

9- मक्षिकायाः मित्रं कः आसीत? - मण्डूकः

10- का भाषा प्राचीनतमा? - संस्कृतभाषा

11- शून्यस्य प्रतिपादनं कः अकरोत? - भास्काचार्य

12- कौटिल्येन रचितं शास्त्रं किम? - अर्थशास्त्रम

13- कस्याः भाषायाः काव्यसौन्दर्यम अनुपमम? - संस्कृतभाषायाः

14- काः अभ्युदयाय प्रेरयिन्ति? - सूक्तयः

15- कस्याः महती जिज्ञासा वर्तते? - अनारिकायाः

16- मन्त्री किमर्थम आगच्छति? - सेतुः उदघाटनार्थ

17- सेतोः निर्माण के अकूर्वन? - कर्मकराः

18- सेतोः निर्माणाय कर्मकराः प्रस्तराणि कुतः आनयन्ति?- पर्वतेभ्यः

19- के सर्वकाराय धनं प्रयच्छन्ति? - प्रजाः

20- का विहसति? - धरणी

21- किम विकसति? - कमलम

22- व्याघ्रः कुत्र गर्जति? - विपिने

23- हरिणः किं खादति? - नवघासम

24- मन्दं कः गच्छति? - उष्ट्रः

25- कदा अश्वः किमपि न खादति? - धावनसमये

## प्र-10 श्लोकांशान योजयत-

1- उदिते सूर्य धरणी विहसति।
पक्षी कूजति कमलं विकसति।।
पुष्पे पुष्पे नानारङ्गाः।
तेषु डयन्ते चित्रपतङ्गाः।।

2- धेनुः प्रातर्यच्छति दुग्धम।
शुद्धं स्वच्छं मधुरं स्निग्धम।।
हरिणोऽयं खादति नवघासम।
सर्वत्र च पश्यति सविलासम।।

3- उष्ट्रः तुङ्गः मन्दं गच्छति।
पृष्ठे प्रचुरं भारं निवहति।।
घोटकराजः क्षिप्रं धावति।
धावनसमये किमपि न खादति।।
पश्यत भल्लुकमिमं करालम।

*विलोमपदानि मेलयत-

| | |
|---|---|
| मन्दम् | क्षिप्रम् |
| नीचैः | उच्चैः |
| कठोरः | स्निग्धम् |
| पुरातनम् | नूतनम् |
| अपर्याप्तम् | पर्याप्तम् |

कोष्ठेकेभ्यः समुचितपदानि चित्वा रिक्तस्थानानि पूरयत-

(क) अहं प्रातः पित्रा सह भ्रमणाय गच्छामि (पित्रा/पितुः)
(ख) बाला आपणात् भ्रात्रे फलानि आनयति। (भ्रातुः/भ्रात्रे)
(ग) कर्मकराः सेतोः निर्माणस्य कर्त्तारः भवन्ति। (कर्तारम्/कर्त्तारः)
(घ) मम पिता तु एतेषां प्रश्नानाम् उत्तराणि अददात्। (पिता/पितरः)
(ङ) तव भ्रातरौ कुत्र जीविकोपार्जनं कुरुतः? (भ्रातरः/भ्रातरौ)

*उदाहरणानुसारं रूपाणि लिखत-

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितरः (पितृ) |
| | भ्राता | भ्रातरौ | भ्रातरः (भ्रातृ) |
| द्वितीया | दातारम् | दातारौ | दातॄन् (दातृ) |
| | धातारम् | धातरौ | धातॄन् (धातृ) |
| तृतीया | धात्रा | धातृभ्याम् | धातृभिः (धातृ) |
| | कर्त्रा. | कर्तृभ्याम् | कर्तृभिः (कर्तृ) |
| चतुर्थी | नेत्रे | नेतृभ्याम् | नेतृभ्यः (नेतृ) |
| | विधात्रे | विधातृभ्याम् | विधातृभ्यः (विधातृ) |

| | | | |
|---|---|---|---|
| पञ्चमी | कर्तुः | कर्तृभ्याम् | कर्तृभ्यः (कर्तृ) |

कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत-

(क) <u>एका</u> बालिका मधुरं गायति। (एकम्, एका, एकः)

(ख) <u>चत्वारि</u> कृषकाः कृषिकर्माणि कुर्वन्ति। (चत्वारः, चतस्त्रः, चत्वारि)

(ग) <u>तानि</u> पत्राणि सुन्दराणि सन्ति। (ते, ताः, तानि)

(घ) धेनवः दुग्धं <u>ददाति</u>। (ददाति, ददति, ददन्ति)

(ङ) वयं संस्कृतम् <u>अपठाम</u>। (अपठम्, अपठन्, अपठाम)